# Nava Ratnam

# નવરત્નમ્

## Document Information

Text title : Navaratnam

File name : navaratnam.itx

Category : misc, subhaashita, nava

Location : doc_z_misc_general

Transliterated by : Aaditya Kalyanaraman

Proofread by : Aaditya Kalyanaraman

Description/comments : Kavyasangraha, Ed. John Haeberlin, 1847, Jibananda Vidyasagara 1888

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# નવરત્નમ્

મિત્રમર્થી તથા નીતિર્ધર્મકાર્પણ્યમૂર્ખકાઃ ।
સ્ત્રીણાં વિદ્વાન્ તથોત્ખાતાન્ નવરત્નમિદં ક્રમાત ॥

મિત્રં સ્વચ્છતયા રિપું નયબલૈર્લુબ્ધં ધનૈરીશ્વરં
કાર્ય્યેણ દ્વિજમાદરેણયુવતીં પ્રેમ્ણા સમૈર્બાન્ધવાન્ ।
અત્યુગ્રં સ્તુતિભિર્ગુરું પ્રણતિભિર્મૂર્ખં કથાભિર્બુધં
વિદ્યાભીરસિકં રસેન સકલં શીલેન કુર્ય્યાદ્વશમ્ ॥ ૧॥

અર્થી લાઘવમુચ્છ્રિતો નિપતનં કામાતુરો લાઞ્છનં
લુબ્ધોઽકીર્તિમસઙ્ગરઃ પરિભવં દુષ્ટોઽન્યદોષે રતિમ્ ।
નિઃસ્વો વઞ્ચનમુન્મના વિકલતાં શોકાકુલઃ સંશયં
દુર્વાગપ્રિયતાં દુરોદરવશઃ પ્રાપ્નોતિ કષ્ટં મુહુઃ ॥ ૨॥

નીતિર્ભૂમિભુજાં નતિર્ગુણવતાં હ્રીરઙ્ગનાનાં ધૃતિ
ર્દમ્પત્યોઃ શિશવો ગૃહસ્ય કવિતા બુદ્ધેઃ પ્રસાદો ગિરામ્ ।
લાવન્યં વપુષઃ સ્મૃતિઃ સુમનસાં શાન્તિર્દ્વિજસ્ય ક્ષમા
સક્તસ્ય દ્રવિણં ગૃહાશ્રમવતાં સ્વાસ્થ્યં સતાં મણ્ડનમ્ ॥ ૩॥

ધર્મઃ પ્રાગેવચિન્ત્યઃ સચિવમતિગતિર્ભાવનીયા સદૈવ
જ્ઞેયં લોકાનુવૃત્તં વરચરનયનૈર્મણ્ડલં વીક્ષણીયમ્ ।
પ્રચ્છાદ્યૌ રાગરોષૌ મૃદુપરુષગુણૌ યોજનીયૌ ચ કાલે
આત્મા યત્નેન રક્ષ્યો રણશિરસિપુનઃસોઽપિ નાપેક્ષણીયઃ ॥ ૪॥

કાર્પણ્યેન યશઃ ક્રુધા ગુણચયો દમ્ભેન સત્યં ક્ષુધા
મર્યાદા વ્યસનૈર્ધનાનિ વિપદા સ્થૈર્યં પ્રમાદૈર્દ્વિજઃ ।
પૈશુન્યેન કુલં મદેન વિનયો દુશ્ચેષ્ટયા પૌરુષં
દારિદ્ર્યેણ જનાદરો મમતયા ચાત્મપ્રકાશો હતઃ ॥ ૫॥

મૂર્ખોઽશાન્તસ્તપસ્વી ક્ષિતિપતિરલસો મત્સરો ધર્મશીલો

દુઃસ્થો માની ગૃહસ્થઃ પ્રભુરતિકૃપણઃ શાસ્ત્રવિદ્ધર્મહીનઃ ।
આજ્ઞાહીનો નરેન્દ્રઃ શુચિરપિ સતતં યઃ પરાન્નોપભોગી
વૃદ્ધો રોગી દરિદ્રઃ સ ચ યુવતિપતિર્ધિગ્વિડમ્બપ્રકારમ્ ॥ ૬॥

સ્ત્રીણાં યૌવનમર્થિનામનુગમો રાજ્ઞાં પ્રતાપઃ સતાં
સત્યં સ્વલ્પધનસ્ય સઞ્ચિતિરસદ્વૃત્તસ્ય વાગ્ડમ્બરઃ ।
સાચારસ્ય મનોદમઃ પરિણતેર્વિદ્યા કુલસ્યૈકતા
સેવાયા ધનમુન્નતેર્ગુણચયઃ શાન્તેર્વિવેકો બલમ્ ॥ ૭॥

વિદ્વાન્ સંસદિ પાક્ષિકઃ પરવશોમાની દરિદ્રો ગૃહી
વિત્તાઢ્યઃ કૃપણઃ સુખી પરવશો વો ન તીર્થાશ્રિતઃ ।
રાજા દુઃસચિવપ્રિયઃ કુલભવો મૂર્ખઃ પુમાં સ્ત્રીજિતો
વેદાન્તી હતસક્રિયઃ કિમપરં હાસ્યાસ્પદં ભૂતલે ॥ ૮॥

ઉત્ખાતાન્ પ્રતિરોપયન્ કુસુમિતાંશ્ચિન્વન્ શિશૂન્વર્દ્ધયન્
પ્રોત્તુઙ્ગાન્ નમયન્નતાન્સમુદયન્ વિશ્લેષયન્ સંહતાન્ ।
તીવ્રાન્ કણ્ટકિનો બહિર્નિયમયન્ ગ્લાનાન્મુહુઃસેચયન્
માલાકાર ઇવ પ્રયોગનિપુણો રાજા ચિરં નન્દતુ ॥ ૯॥

ઇતિ નવરત્નં સમાપ્તમ્ ।

Encoded and proofread by Aaditya Kalyanaraman

*Nava Ratnam*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*